॥ श्रीजिनायनमः ॥

# ॥ श्रीहंसराजचरित्रम् ॥

(भाषांतरसहित)

( कर्त्ता-श्रीवर्धमानसूरि )

छपावी प्रसिद्ध करनार—पंडित श्रावक हीरालाल हंसराज (जामनगरवाळा)

सने १९३४ किंमत रु. ०-१२-० संवंत् १९९१

श्रीजैन भास्करोदय प्रिन्टिंग प्रेसमां छाप्युं—जामनगर.

॥ श्रीजिनाय नमः ॥

# ॥ अथ श्रीहंसराजभूपतिचरित्रं प्रारभ्यते ॥

गुजराती भाषांतर कर्त्ता–पंडित श्रावक हीरालाल हंसराज (जामनगरवाळा)

(द्वितियावृत्ति) (मूळकर्त्ता–वर्धमानसूरि)

पयोवाह इवाहिंसावल्लिपल्लवनक्षमः । मृषावादविरागस्तु सतां भवदवच्छिदे ॥ १ ॥

अ०—मेघनीपेठे जीवदयारूपी वेलडीने नवपल्लव करवामां समर्थ, एवो मृषावादनो त्याग खरेखर सज्जनोना संसाररूपी दावानलनो विनाश करनारो थाय छे, ॥ १ ॥

अणुव्रतं द्वितीयं तद्वाच्यं यत्क्वापि नानृतम् । भूकन्यागोधनन्यासकूटसाक्ष्ये विशेषतः ॥ २ ॥

अ०—जे क्यांयें पण असत्य न बोलवुं, तेने बीजुं अणुव्रत जाणवुं, अने तेमां पण भूमि, कन्या, गाय धननी थापण, अने असत्य साक्षीना संबंधमां तो विशेषें करीने असत्य न बोलवुं. ॥ २ ॥

जन्तूनामहितं यत्तन्न वाच्यं सत्यमप्यहो । सुधीभिर्वाक्प्रपञ्चेन बोधनीयोऽत्र पृच्छकः ॥ ३ ॥

अ०—जे प्राणीओने अहित करनारुं होय, तेवुं सत्य पण अहो! न बोलवुं, ते वखते बुद्धिवानोए पूछनारने वचननी चतुराइथी समजाववो. ॥ ३ ।

**असत्यमपि निश्चित्य वाच्यं धर्महितं वचः । न सत्यमपि तत्साम्यमेति पुण्यचयश्रिया ॥ ४ ॥**

अ०—आ धर्मने हितकारी छे, एवो निश्चय करीने असत्य वचन पण बोलवुं, केमके तेमां पुण्यनो संचय थतो होवाथी सत्य पण तेनी बरोबरी करी शकतुं नथी. ॥ ४ ॥

**ईदृक्सत्यगिरां वक्ता यथा राजपुरीपतिः । वैभवं विभरामास हंसः संश्रूयतां तथा ॥ ५ ॥**

अ०—आवी रीतनी सत्य वाणी बोलनारो राजपुरी नामनी नगरीनो स्वामी हंसराजा जे रीते समृद्धि पाम्यो, तेनुं वृत्तांत सांभळो?

**अश्रान्तधर्मरचनः स सत्यवचनव्रतः । मासगम्ये वनीरम्ये रत्नशृङ्गाभिधे गिरौ ॥ ६ ॥**

**पूर्वजैः स्थापिते चैत्ये चैत्रीयात्रोत्सवे नृपः । चचालाल्पपरीवारो नन्तुं श्रीऋषभं जिनम् ॥ ७ ॥**

अ०—निरंतर धर्म करनारो, अने सत्य वचनना व्रतवाळो ते राजा, एक मासना पंथवाळा, तथा वचनना समूहथी मनोहर रत्नशृंगनामना पर्वतपर पूर्वजोए बन्धावेलां जिनमंदिरमां चैत्रीपुनेमनी यात्राना महोत्सवमां स्वल्पपरीवार सहित श्रीऋषभदेवप्रभुने वांदवामाटे चाल्यो. ॥ ६ ॥ ७ ॥ युग्मं ॥

**अर्धवर्त्मनि तं यान्तं चरस्तारतरस्वरः । व्यग्रो व्यज्ञपयामास कश्चित्पश्चादुपागतः ॥ ८ ॥**

अ०—एवामां अर्धे मार्गे जता एत्रा ते हंसराजाने अति उतावलथी आवेलो अने व्याकुल थयेलो कोइक बातमीदार पाछळथी आवीने कहेवा लाग्यो के, ॥ ८ ॥

**यात्रार्थं त्वयि निर्याते नरेश दशमेऽहनि । सीमालोर्जुनभूपालःत्वत्पुरीं शत्रुरापतत् ॥ ९ ॥**

अ०—हे राजन् ! तमो यात्रा माटे निकळ्याबाद दशमे दिवसे सीमाडापर रहेतो ( आपनो ) शत्रु अर्जुननामनो राजा आपनी नगरीपर चडी आव्यो छे. ॥ ९ ॥

**निरस्य त्रस्यतः सर्वान्निहत्य विहितायुधान् । सभाण्डागारहस्त्यश्वं स राजगृहमग्रहोत् ॥ १० ॥**

अ०—नाशता चोकीदारोने हांकी कहाडीने, तथा हथीयार लेइ सामे थनाराओने हणीने, ते राजाए भंडार तथा हाथी घोडा सहित राजमेहलनो कबजो लेइ लीधो छे. ॥ १० ॥

**भयातुरं पुरं कृत्स्नमानन्याभयदानतः । स सिंहासनमासीनः सद्यः स्वाज्ञामदापयत् ॥ ११ ॥**

अ०—वळी भयभीत थयेलां समस्त नगरने अभयदानथी आनंदित करीने राज्यगा दीपरबेसीने तेणे पोतानी आज्ञा वर्तावी छे. ११

**अन्यालयनिलीनेन श्रीसुमन्त्रेण मन्त्रिणा । अतस्त्वयि नियुक्तोऽहं युक्तं यत्तद्विधीयताम् ॥ १२ ॥**

अ०—तेथी बीजाना घरमां छूपाइने रहेला श्रीसुमंत्रनामना (आपना) मंत्रीए मने आपनी पासे मोकल्यो छे, माटे ( हवे जेम आपने ) योग्य लागे तेम करो ! ॥ १२ ॥

अथाब्रुवन्भ्रुवः क्षेपात्तं नृपं निकटा भटाः । वलामहे महेष्वास त्वत्पुरः कः स्फुरेत्परः ॥ १३ ॥

अ०—पछी भ्रकुटीना आक्षेपथी पासे रहेला सुभटो ते राजाने कहेवा लाग्या के, हे महान धनुर्धर! आपणे (अहींथीज) पाछा वळीये, केमके आपनी पासे क्यो शत्रु सामो आवे तेम छे.? ॥ १३ ॥

तदाप्यकम्पितं दन्तुद्युतिपुष्पैरुरोऽर्चयन् । अजातमुखमालिन्यस्तानभाषत भूपतिः ॥ १४ ॥

अ०—आवे वखते पण (पोतानां) निश्चल हृदयने दांतोनी कांतिरूपी पुष्पोवडे पूजता एवा ते हंसराजाए मुखपर मलीनता लाव्या विना तेओने कह्युं के, ॥ १४ ॥

संपदो विपदोऽपि स्युः पूर्वकर्मवशंवदाः । मूढा मुदं विसादं वा तत्संपत्तिषु तन्वते ॥ १५ ॥

अ०—संपत्ति अथवा विपत्ति पण पूर्वे करेलां कर्मोने अनुसारज थाय छे, परंतु मूढ माणसोज तेनी प्राप्ति माटे हर्ष अथवा खेद पामे छे.

नेदानीं भाग्यलभ्याय युक्तं राज्याय धावनम् । भाग्यलभ्यं परित्यज्य जिनयात्रामहोद्यमम् ॥ १६ ॥

अ०—आ समये सद्भाग्योथी मळे एवी आ श्रीतीर्थंकरप्रभुनी यात्रानो प्रयत्न तजीने भाग्यथी मळी रहेनारां राज्यमाटे दोडवुं (पाछा जवुं) युक्त नथी. ॥ १६ ॥

तद्यात्रामसमाप्यैनां न वले धवलेक्षणाः । विघ्नैःप्रारब्धसत्कर्मसंत्यागोऽधमचेष्टितम् ॥ १७ ॥

अ०—माटे हे निर्मल चक्षुवाळा सुभटो ! आ यात्रा पूरी कर्याविना हु पाछो वळवानो नथी, केमके विघ्नोने लीधे प्रारंभेलां उत्तम कार्योनो त्याग जे करवो, ते अधमोनुं आचरण छे. ॥ १७ ॥

**इत्युक्त्वा वाहयामास वाहवाहनमध्वनि । भूपतिः कम्पितक्रूरपातकादिचमूच्चयः ॥ १८ ॥**

अ०—एम कहीने कंपावेल छे क्रूर पापो आदिकनी सेनानो समूह जेणे, एवो ते राजा (पोतानी) घोडागाडीने मार्गे चलाववा लाग्यो.

**परिवारजनेनाथ नाथभक्तिवियोगिना । स्वस्वमानुषवीक्षार्तिभाजा राजा व्यमुच्यत ॥ १९ ॥**

अ०—पछी स्वामिनी भक्ति करवामां कंटाळेला, तथा पोतपोताना स्वजनोनी संभाळ माटे खेद पामेला, एवा तेना परिवारना लोकोए (ते) राजाने तजी दीधो, ॥ १९ ॥

**यथा यथा स तैर्मुक्तो मुदं भेजे तथा तथा । त्रुटन्ति यात्राभाग्यस्य भागिनोऽमी क्रमादिति ॥ २० ॥**

अ०—( ए रीते ) जेम जेम ते राजाने तेओ छोडी गया, तेम तेम ते आनंद पामवा लाग्यो, तथा यात्राना पुण्यना आ भागीदारो ओछा थाय छे, एम ते मानवा लाग्यो. ॥ २० ॥

**अथ च्छत्रभृतैकेन युक्तो मुक्तोजनैर्नृपः । कामप्यवापदेकाकी मार्गभ्रष्टो महाटवीम् ॥ २१ ॥**

अ०—पछी फक्त एक छत्रधरथी युक्त थयेलो तथा परिवारना मनुष्योए तजी दीधेलो ते एकलो राजा मार्ग चुकी जवाथी भयंकर जंगलमां जइ चड्यो. ॥ २१ ॥

चारुचीरवरेण्याश्वशुभाभरणवीक्षणात् । भूरिलोभेन मा भिल्लाः सानन्दाः खेदयन्तु माम् ॥ २२ ॥
उत्तरीयमिति च्छत्रधरस्य परिधाय सः यात्रैकधीर्दिशो वीक्ष्य प्राचलत्तीर्थदिङ्मुखः ॥ २३ ॥ युग्मम् ॥

अ०—मनोहर वस्त्र, उमदा घोडा तथा सुंदर अलंकारो जोइने अतिलोभना मार्या हर्ष पामेला भिल्लो मने हेरान न करे तो ठीक. ॥ २२ ॥ एम विचारीने, ते छत्रधरनो (सादो) पोषाक पहेरीने, फक्त यात्रा करवानीज इच्छावाळो ते राजा दीशाओ तरफ जोइने, ते तीर्थनी दिशासन्मुख चालवा लाग्यो. ॥ २३ ॥ युग्मं ॥

अथैकः पश्यतस्तस्य जातवातवरत्वरः । एत्यातुरो लतापुञ्जनिकुञ्जमविशन्मृगः ॥ २४ ॥

अ०—एवामां वायुवेगे दोडतो एक गभरायेलो हरिण तेना देखतां वेलडीओना समूहनी घटामां जइ छुपाइ गयो. ॥ २४ ॥

किरातः कश्चिदायातस्तमनु स्फारयन्धनुः । दकूपथातीतसारङ्गः । क्ष्माभुजङ्गमुवाच तम् ॥ २५ ॥

अ०—(एवामां) तेनी पाछळ कोइक भिल्ल धनुषनी टंकार करतो आवी पहोंच्यो, तथा ते हरिणने दृष्टिमार्गमांथी दूर थयेलो जाणीने ते राजाने ते कहेवा लाग्यो के, ॥ २५ ॥

अत्र पत्रततिच्छन्ने न पश्यामि पदं वने । मद्भक्ष्यं स मृगः क्वागान्ममेश कृपया दिश ॥ २६ ॥

अ०—हे स्वामी ! आ पांदडांओथी छवायेलां वनमां हुं पगलां जोइ शकतो नथी, मारुं भक्ष्य ते हरिण क्यां गयो ? मने महेर-

वानी करी बताव ? ॥ २६ ॥

सत्ये ख्याते मृगवधोऽन्यथा ख्याते मृषावचः । तद्बुद्ध्या विप्रतार्योऽयमिति ध्यात्वावदन्नृपः ॥२७॥

अ०—जो सत्य बोलुं तो हरिणनो वध थाय, अने जो जूठुं बोलुं तो मृषावादनुं पाप लागे माटे आने बुद्धिनी युक्तिथी छेतरवो, एम विचारी राजाए कह्युं के, ॥ २७ ॥

भोः पृच्छसि स्वरूपं मे मार्गभ्रष्ट इवापतम् । व्याधोऽभ्यधादहो मूढ त्रस्तः क्वागान्मृगो वद ॥२८॥

अ०—अरे ! तुं शुं मारुं वृतांत पूछे छे ? हुं तो मार्गमां भूलो पडवाथी आवी चडयो छुं (त्यारे) ते शिकारीए कह्युं के अरे मूर्ख ! कहे के, ते नाशी छूटेलो हरिण क्यां गयो ? ॥ २८ ॥

नृपः प्राह महाभाग हंस इत्यभिधा मम । उच्चैराचष्ट मृगयुर्दिश मार्गं मृगस्य मे ॥ २९ ॥

अ०—(त्यारे) राजाए कह्युं के, हे महाभाग्यशाली ! मारुं नाम हंस छे, (त्यारे) ते शिकारीए म्होटेथी कह्युं के, मने ते हरिणनो मार्ग बताव ! ॥ २९ ॥

जगतीशो जगौ मित्र स्थानं राजपुरी मम । भिल्लोऽभ्यधात्क्रुधा रेऽन्यत्पृच्छ्यसेऽन्यत्प्रजल्पसि ॥३०॥

अ०—राजाए कह्युं के, हे मित्र ! मारुं स्थान राजपुरी छे. (त्यारे) भिल्ले क्रोधथी कह्युं के, अरे जड ! पूछुं छुं बीजुं अने उत्तर (तेथी) बीजोज आपे छे. ॥ ३० ॥

व्याजहार स राजन्यो मित्राहं क्षत्रियान्वयः । अत्युच्चैरूचिवान्व्याधः किं महाबधिरोऽसि भोः ॥३१॥

अ०—ते राजाए कह्युं के, हे मित्र ! हुं क्षत्रियवंशनो छुं, त्यारे ते शिकारी बहुज घांटो पाडीने बोली उठ्यो के, अरे! शुं तुं अत्यंत बहेरो छे? ॥ ३१ ॥

भूपोऽवद्दिशसि मे यन्मार्गं यामि तत्पुरम्। व्याधोऽभ्यधत्त बाधिर्यव्याधिर्यः सोऽस्तु ते चिरम् ॥३२॥

अ०—राजाए कह्युं के, जो मने तुं मार्ग बतावे तो, (म्हारा) नगरमां जाउं. त्यारे शिकारी बोल्यो के, तने जे आ बहेरापणानो रोग छे, ते चिरकाल सुधी रहो. ॥ ३२ ॥

इत्युक्त्वैणनिराशोऽयमगाद् व्याधो यथागतम् । ययौ पुण्यभराक्रान्तः क्ष्माकान्तस्तु शनैः पुनः ॥३३॥

अ०—एम कहीने ते शिकारीतो हरिणमाटे निराश थइने जेवो आव्यो हतो तेवो चाल्यो गयो. अने पुण्यना समूहथी भारी थयेलो ते राजा तो (त्यांथी) धीमे धीमे (आगळ) चालवा लाग्यो. ॥ ३३ ॥

मतिमान्यतिमायान्तमेकमग्रे निरीक्ष्य सः । नत्वा मार्गं च मुक्त्वा च पुरावरप्राचलन्नृपः ॥ ३४ ॥

अ०—(एवामां) ते बुद्धिवान् राजा आगळ एक मुनिने जता जोइने, तेमने नमीने, तथा मार्ग मूकीने प्रथमनीपेठे (आगळ) चालवा लाग्यो. ॥ ३४ ॥

कृतान्तस्येव दृक्पातौ ततः कोपारुणो पुरः । एत्य भिल्लावुभौ भीमभ्रुकुटी भूपमूचतुः ॥ ३५ ॥

अ०—पछी आगळ चालतां यमना दृष्टिपातनीपेठे क्रोधथी लाल थयेला, तथा भयंकर भृकुटिवाळा बे भिल्लो आवीने राजाने कहेवा लाग्या के, ॥ ३५ ॥

चिरात्पल्लीपतिः शूरश्चौर्यबुद्धयाद्य निःसृतः । दूरादस्मिन्वने मुण्डं पाषण्डिनमलोकत ॥ ३६ ॥

अ०—घणे काळे शूरनामनो पल्लीपति आजे चोरी माटे निकळ्यो हतो, ( एवामां ) दूरथी आ वनमां तेणे ( एक ) पाखन्डी मुन्डाने जोयो. ॥ ३६ ॥

जानन्नशकुनं तं स तद्वधायोद्यतायुधौ । आवां प्रेष्यो द्रुतं प्रैषीद्दृष्टः क्वाप स कथ्यताम् ॥ ३७ ॥

अ०—तेने अपशकुन मानता एवा ते पल्लीतिए, ते मुंडाने मारी नाखवामाटे हथीयारबन्ध एवा अमो बन्ने नोकरोने तुरत मोकल्या छे, माटे कहे के, ते मुन्डो क्यांथे तारा जोवामां आव्यो छे ? ॥ ३७ ॥

दध्यौ राजा मयि व्याजवाचि वा मौनभाजि वा । सरलेन पथा यान्तौ कृतान्तौ तन्मुनेरिमौ ॥ ३८ ॥

अ०—राजाए विचार्यु के, जो हुं ( बेहेरानी पेठे ) उलटो उत्तर आपीश, अथवा मौन रहीश तो सिद्धे मार्गे चालनारा आ बन्ने भिल्लो ते मुनिने यमसरखा थइ पडशे ( मारी नाखशे. ) ॥ ३८ ।

संप्रत्यसत्यमप्युक्तं सत्यादप्युरुपुण्यकृत् । इति शब्दच्छलात्सत्यमसत्यमयमभ्यधात् ॥ ३९ ॥

अ०—आ समये कहेलुं असत्य वचन पण, सत्यथी पण वधारे पुण्य करनारुं छे, एम विचारी शब्दछळथी तेणे असत्यरूप सत्य कह्युं के, ॥ ३९ ॥

वामेन याति दुःखाध्वजुषामशकुनाय सः । लभ्यो युवाभ्यां न यथा तथाद्भुतगतिर्यतिः ॥ ४० ॥

अ०—दुःखी वटेमार्गुओना अपशुकनमाटे ते डाबी बाजुएथी जाय छे, वळी ते मुनि एवी अद्भुत गतिवाळो छे के, जेथी तमोने ते मळी शकवानो नथी. ॥ ४० ॥

मार्गे तद्वचसा तस्मिंस्तौ मुधा पर्यधावताम् । असद्गुरूपदेशनासंयमस्येव वर्त्मनि ॥ ४१ ॥

अ०—कुगुरुना उपदेशथी (मनुष्य) जेम असंयमना मार्गमां जाय, तेम ते बन्ने भिल्लो तेना कहेवाथी फोकट ते मार्गमां दोडवा लाग्या. ॥ ४१ ॥

तादृग्वागमृतासेकवर्धिष्णुसुकृतद्रुमः । यशःप्रसूनैः सुरभिस्तथैव पथि सोऽचलन् ॥ ४२ ॥

अ०—तेवीरीतनां वचनामृतना सिंचनथी वृद्धि पामतुं छे पुण्यरूपी वृक्ष जेनुं, तथा यशरूपी पुष्पोवडे सुगंधि थयेलो ते हंसराजा तेवीज रीते मार्गमां ( आगळ ) चालवा लाग्यो. ॥ ४२ ॥

प्रसूनपातसुरभीभूतभूतलमण्डलम् । शयनाय निशारम्भे सारं भेजे स भूरुहम् ॥ ४३ ॥

अ०—पुष्पोना पडवाथी सुगन्धी थयेल छे. पृथ्वीतलनुं मन्डल ज्यां, एवाएक सुन्दर वृक्षपर रात्रिना प्रारंभसमये सुवामाटे ते राजा चड्यो. ॥ ४३ ॥

तृतीयेऽह्नि पतिष्यामः संघे तस्मिन्धनाम्बुधौ । दारिद्र्यभारमुन्मुच्य तरिष्यामो धनोर्मिषु ॥ ४४ ॥

प्राक्पात एव हन्तव्या हन्त केचिज्जनाः पुनः । भीवश्यस्त्रस्यति यथा वाता तुच्छपरिच्छदः ॥ ४५ ॥

इत्यदूरे लतागुल्मे बहूनां बलशालिनाम् । वचः कर्णचरीकृत्य श्रुत्वा सोऽचिन्तयन्नृपः ॥ ४६ ॥

अ०—( आजथी ) त्रीजे दिवसे धनना महासागरसरखा ते सङ्घउपर आपणे त्रुटी पडशुं, ( अने तेथी ) दरिद्रतानो भार छोडीने धनना मोजांओमां तरसुं. ॥ ४४ ॥ अरे ! वळी पहेलाज हल्लामां केटलाक माणसोने तो मारीज नाखवा, के जेथी बीकनो मार्यो स्वल्प परीवारवालो ते सङ्घनो रक्षक तो नाशी जाय. ॥ ४५ ॥ एवीरीते नजीकमां वेलडीओनी झाडीमां घणा बळवान (भिल्लोनां) वचनोने कान मांडी सांभळीने ते हंसराजा विचारवा लाग्यो के, ॥ ४६ ॥ त्रिभिर्विशेषकं ॥

केचिन्मलिम्लुचाः काममिह विश्राममागताः । साधुसंघानघानाय दुर्जने दुर्गणा इव ॥ ४७ ॥

अ०—दुर्जनमां दुर्गुणोनीपेठे, केटलाक लुंटाराओ कोइ उत्तम सङ्घनो नाश करवामाटे स्वेच्छाथी अहीं विश्राम लेवामाटे आवेला

जणाय छे. ॥ ४७ ॥

दूरादेभिः स्फुटं लुण्ट्यः संघो धर्मरुचिः क्वचित् । एकाकिना मया शक्यः केनोपायेन रक्षितुम् ॥४८॥

अ०—क्यांक दूरना भागमां आ लुंटाराओने खरेखर (कोइक) धार्मिक सङ्घने लुंटवो छे, (हवे) हुं एकलो क्या उपायथी ते सङ्घनुं रक्षण करी शकुं ? ॥ ४८ ॥

इति चिन्तामसौ कुर्वन्निद्रया दूरितस्तदा । दीपदीप्तदिशोऽपश्यद्वीरान्कानप्युदायुधान् ॥ ४९ ॥

अ०—एम चिंता करतो ते हंसराजा जेवामां निद्रा रहित थइ (बेठो हतो) तेवामां दीपकोथी दिशाओने प्रकाशित करनारा, तथा उगामेलां शस्त्रोवाळा सुभटोने तेणे जोया. ॥ ४९ ॥

कोऽप्यसौ तस्करपुमानित्युत्थाप्य क्रुधा स तैः । मूर्त्यालोकानमहात्मायं कोऽपीत्युद्धाट्य भाषितः ॥५०॥

अ०—आ कोइक लुंटाराओमांहेलो पुरुष छे, एम विचारी क्रोधथी तेओए तेने उठाड्यो, परंतु तेनो चेहेरो जोवाथी, आ तो कोइक महान् पुरुष लागे छे, एम विचारी तेओ तेने पूछवा लाग्या के, ॥ ५० ॥

चोराः केचित्क्वचिद्दृष्टा वदन्तो वा श्रुतास्त्वया । दिष्टा हि हेरिकेणेह पथि संघजिघांसवः ॥ ५१ ॥

अ०—केटलाक चोरो (शुं) क्यांयें तें जोया ? अथावा बोलता सांभल्या छे ? केमके तेओ संघने मारवानी इच्छाथी आ मार्गे आव्या छे, एम अमारा छुपा बातमीदारे अमोने खबर आप्या छे. ॥ ५१ ॥

यौजनैर्दशभिः स्थानादितोऽस्ति श्रीपुरं पुरम् । गाधिस्तस्याधिपो जैनस्तान्हन्तुं प्रजिघाय नः ॥ ५२ ॥

अ०—आ स्थानथी दस जोजनपर श्रीपुरनामनुं नगर छे, त्यांना गाधिनामना जैन राजाए ते लुंटाराओने मारवा माटे अमोने मोकल्या छे. ॥ ५२ ॥

तदाशु दिश जानासि यदि येन निहत्य तान् । यशो लभामहे संघरक्षया सुकृतानि च ॥ ५३ ॥

अ०—माटे जो तुं जाणतो होय तो तुरत बताव? के जेथी तेओने मारीने यश, तथा सङ्घनुं रक्षण करीने अमो पुण्य उपार्जन करीये.

अथ दध्यौ धराधीशः सत्योक्तिस्तान्दिशामि चेत् । समालिङ्गति सर्वाङ्गं तन्मां तद्वधपातकम् ॥ ५४ ॥

अ०—त्यारे ते हंसराजा विचारवा लाग्यो के, जो कदाच सत्य वचन बोलीने ते लुंटाराओने हुं बतावुं तो तेओना वधनुं पाप मने सघलुं लागवानुं छे. ॥ ५४ ॥

यदि तान्न दिशाम्याशु तदेतैरनिपातिताः । भवन्ति मम ते संघघातपातकदायिनः ॥ ५५ ॥

अ०—वळी जो हुं ते चोरोने तुरत न बतावुं, तो तेओथी बचीने जीवता रहेला आ चोरो मने सङ्घना विनाशनुं पाप आपनारा थाय छे. ॥ ५५ ॥

तत्किमत्र करोमीति ध्यानादुत्पन्नधीः सुधीः । तान्बभाषे भटानत्र दृष्टा दृष्ट्वा मया न ते ॥ ५६ ॥

अ०—मटे हुं शुं करुं ? एम विचारतां तर्क उत्पन्न थवाथी ते सुबुद्धि राजाए ते सुभटोने कह्युं के, में अहीं ते चोरोने नजरे जोया नथी. ॥ ५६ ॥

**तद्विलोकाय युष्माकं युक्तं नेह विलम्बितुम् । यत्रास्ति संघस्तत्राशु गम्यतां त्रातुमातुरैः ॥ ५७ ॥**

अ०—ते चोरने जोवा माटे तमारे अहीं खोटी थवुं योग्य नथी, माटे ज्यां सङ्घ छे त्यां उत्साहथी तेनुं रक्षण करवा माटे तमारे जवुं जोइए. ॥ ५७ ॥

**तेऽपि तत्र गमिष्यन्ति याथ तत्प्रथमं यदि । ततश्च कीर्तिर्धर्मश्च भवतां भवतोऽद्भुतौ ॥ ५८ ॥**

अ०—ते चोरो पण त्यांज जशे, माटे तेओनी पहेलां जो तमो त्यां पहोंचो तो तमोने अद्भुत कीर्ति तथा धर्म प्राप्त थशे. ॥५८॥

**इत्युक्त्यात्तचमत्कारास्ते संघाभिमुखं ययुः । चौरास्तु गुल्मान्निर्गत्य प्रणिपत्य तमब्रुवन् ॥ ५९ ॥**

अ०—ए रीतनां वचनथी आश्चर्य पामेला ते सुभटो सङ्घसन्मुख चाल्या गया, अने ते चोरो पण झाडीमांथी निकळीने, ते हन्सराजाने नमीने कहेवा लाग्या के, ॥ ५९ ॥

**गुल्मे सन्तो वदन्तोऽत्र ज्ञाता एव त्वया वयम् । न ख्याता नृपवीरेभ्यः पिता प्राणप्रदोऽसि नः ॥६०॥**

अ०—आ झाडीमां रहीने अमो बोलता हता, तेनी तने तो खबरज हती, छतां तें राजाना सुभटोने ते हकीकत जणावी नही, माटे अमोने जीवन आपनार तुं अमारा पिता समान छे. ॥ ६० ॥

धर्मदुग्धार्णवज्योत्स्नां पापध्वान्तरविच्छविम् स्तुमो धियं तव यया वयं संघश्च रक्षिताः ॥ ६१ ॥

अ०–धर्मरूपी क्षीरसमुद्रने चांदनी सरखी तथा पापरूपी अन्धकारप्रते सूर्यनी कांतिसरखी तारी बुद्धिनी अमो स्तुति करीए छीये, के जे बुद्धिवडे तें अमारुं अने सङ्घनुं पण रक्षण कर्युं. ॥ ६१ ॥

इत्युक्त्वा ते वलित्वागुः प्रगे सोऽप्यचलत्पुरः । अनवेत्य सत्वरैरश्ववारैः कैश्चिदभाष्यत ॥ ६२ ॥

अ०—एम कहीने ते चोरो ( त्यांथी ) पाछा वळी गया, अने प्रभाते ते हंसराजा पण आगळ प्रयाण करवा लाग्यो, (एवामां) उतावळे चालता केटलाक घोडेस्वारोए तेनी पाछळ आवीने तेने कह्युं के, ॥ ६२ ॥

दण्डितास्मत्पतेस्त्रस्यन्हंसो राजपुरीश्वरः । दृष्टः क्वापीह तं हत्वा तरामो वैरवारिधिम् ॥ ६३ ॥

अ०—दन्डायेला एवा अमारा स्वामीथी नासता फरता, अने राजपुरी नगरीना हंसनामना राजाने अहीं तें क्यांय जोयो? केमके तेने मारीने अमारे वैररूपी महासागरने तरवो छे. ॥ ६३ ॥

स्वजीविताय कः पापं वदत्यनृतमित्यथ । अहं स हंस इत्युक्त्वा धृतास्त्रोऽसौ पुरः स्थितः ॥ ६४ ॥

अ०—पोताना जीवनमाटे पापदायी जूठुं कोण बोले? एम विचारीने "हुं पोते ते हंसराजा छुं" एम कही हथीयार लेइ ते तेओनी आगळ उभो. ॥ ६४ ॥

सस्मार च नमस्कारान्राजा धर्मे धियं दधत् । दुन्दुभिः खे च दध्वान पुष्पवृष्टिः पपात च ॥ ६५ ॥

अ०—तथा धर्ममां बुद्धि राखीने ते राजा (पञ्च परमेष्ठिना) नमस्कारोनुं स्मरण करवा लाग्यो. (एवामां) आकाशमां दुन्दुभि वागवा लागी, तथा पुष्पोनी वृष्टि थवा लागी. ॥ ६५ ॥

सत्यवादिञ्जय जयेत्यानन्दविशदं वदन् । सम्यग्दृक्तद्वनाध्यक्षः तस्य यक्षः पुरोऽभवत् ॥ ६६ ॥

अ०—हे सत्यवादी राजन्! तुं जय पाम! जय पाम! ए रीतनां हर्षकारक वचनो बोलतो ते वनो अधिष्ठाता सम्यग् दृष्टि यक्ष तेनी पासे हाजर थइ उभो. ॥ ६६ ॥

प्रीतस्त्वत्सत्यवादेन त्रासितत्वदरिव्रजः । एतद्वनपतिर्यक्षस्त्र्यक्षाख्यस्त्वां वदाम्यदः ॥ ६७ ॥

अ०—तारी सत्य वाणीथी खुशी थयेलो, अने तारा शत्रुओने नसाडी मूकनारो त्र्यक्षनामनो आ वननो मालिक हुं यक्ष तने एम कहुं छे के, ॥ ६७ ॥

तीर्थे त्वदीप्सिते यात्र यत्र स्यादद्य तद्दिनम् । तद्यामो जिनमानन्तुं मद्विमानमलंकुरु ॥ ६८ ॥

अ०—तारां मनवांछित जे तीर्थमां यात्रा भराय छे, ते दिवस आजेज छे, माटे आपणे त्यां जिनवंदन माटे जइये, तुं मारां विमानने शोभावी ले. (अर्थात् मारां विमानमां बेसी जा.) ॥ ६८ ।

इत्यस्योक्त्या विमानं तद्यमारूढवान्मुदा । स्वं चालोकत तत्कालं दिव्यमण्डनमण्डितम् ॥ ६९ ॥

अ०—ए रीतनां ते यक्षना वचनथी ते हंसराजा हर्षथी ते विमानमां चड्यो, अने तेज समये ते पोताने दिव्य आभूषणोथी अलंकृत थयेलो जोवा लाग्यो. ॥ ६९ ॥

दिव्यगायनवर्गेण गीयमानयशोगुणः । गुह्यकार्धासनासीनः स जैनं धाम तद्ययौ ॥ ७० ॥

अ०—दैविक गवैयाओना समूहवडे गवाता यशोगुणवाळो तथा ते यक्षनी साथे तेना अर्धा आसनपर बेठेलो ते हंसराजा ते जैनतीर्थमां पहोंची गयो. ॥ ७० ॥

दिव्यद्रुकुसुमैर्दिव्यगन्धद्रव्यरसैरसौ । दिव्यप्रेक्षणकैश्चात्र जिनयात्रां समाप्तवान् ॥ ७१ ॥

अ०—अहीं ते हंसराजाए दिव्य कल्पवृक्षनां पुष्पोवडे, दिव्य सुगन्धि द्रव्योना रसोवडे तथा दिव्य नाटकोवडे जिनेश्वरप्रभुनी यात्रा संपूर्ण करी. ॥७१ ॥

स्वस्थाने च गतः शत्रुंयक्षबद्धं विमुच्य सः । पुरीं प्रमोदयामास नृपासनगतो नृपः ॥ ७२ ॥

अ०—पछी पोताने स्थानके गयेलो ते राजा, यक्षे बांधेला ते शत्रुने छोडीने राज्यसिंहासनपर बेसीने नगरीने आनंद पमाडवा लाग्यो.

भोगैरभूतलप्राप्यैः प्रीणनीयोऽयमन्वहम् । अन्तरायनिकायश्च रक्ष्योऽस्मिन्पुण्यकारिणि ॥ ७३ ॥

इत्युक्त्वा प्रीतिचतुरश्चतुरः सुरकिंकरान् । यक्षः श्रीहंसमापृच्छ्य द्यां ययौ द्युतिदीप्तदिक् ॥७४॥ युग्मं ॥

अ०—पृथ्वीतलपर न मळी शके एवा (उमदा) भोगथी आ राजाने हमेशां (तमारे) खुशी करवो, तेमज आ पुण्यशालि राजानो अंतरायोनो समूह दूर करवो, ॥ ७३ ॥ एम प्रेम भरेलो ते यक्ष चार देव किंकरोने हुकम करीने तथा ते श्रीहंसराजानी रजा लेइने कांतिथी दिशाओने दीपावतोथको स्वर्गमां चाल्यो गयो. ॥ ७४ ॥ युग्मं ॥

अहो सत्योक्तिमाहात्म्यमिहापि प्राप यन्मुदम्। परलोके तु स स्वर्गसंपदं हंसभूपतिः ॥ ७५ ॥

अ०—अहो ! सत्यवचननो (केवो) महिमा छे ? के जेथी आ लोकमां पण ते हंसराजा आनंद पाम्यो, अने परलोकमां पण स्वर्गनी संपत्ति पाम्यो. ॥ ७५ ॥

मृषवादविषाटोपक्लेशलोपसुधारसे । सत्यवादे रता नित्यं भवन्तस्तद्भवन्तु भोः ॥ ७६ ॥

अ०—माटे मृषावादरूपी विष विकारना क्लेशने दूर करवा माटे अमृतसरखा सत्यवादमां हे भव्य लोको ! तमे हंमेशां रक्त थाओ.

॥ सत्यव्रतउपर श्रीहंसराजचरित्र समाप्त थयुं ॥

॥ आ चरित्र श्रीवासुपूज्यचरित्रनामनामहाकाव्यमांथी स्वपरनाश्रेयने माटे तेनुं गुजराती भाषांतर करी जामनगर निवासी पंडित श्रावक हीरालाल हंसराजे पोताना जैनभास्करोदय प्रिन्टिंग प्रेसमां छापी प्रसिद्ध कर्युं छे । श्रीरस्तु ॥

॥ इति श्रीहंसराजचरित्रं समाप्तम् ॥